"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ।"
इति वचनस्य विष्णुभागवतं विषयोऽस्त्वित्याहुस्तदसत् । ह्यग्रीवब्रह्मविद्याखण्डस्य सारस्वतकल्पभवत्वप्रतिपादकानां वचनानां निर्मूलत्वात् समूलत्वेऽपि यस्मिन् पुराणे यस्य कल्पस्य प्रथमतः प्रतिपादनं तत्कल्पप्रतिपादकमेव तत्पुराणमिति नियमः सर्व्वपुराणे तथा दृष्टत्वात् । तथा च ह्यग्रीवब्रह्मखण्डस्य दशमस्कन्धे विद्यमानत्वेऽपि प्रथमतस्तत्कथाया अभावात्पाद्मकल्पकथायाः प्रथमतो विद्यमानत्वस्य स्वेनैवोक्तत्वाच्च । न सारस्वतस्य कल्पस्येति वचनस्य विष्णुभागवतं विषयः । किञ्च ह्यग्रीवब्रह्मखण्डस्य यथा दशमस्कन्धे कथनं तदा सर्व्वपुराणेषु तत्कथनं वर्त्तत एवेति सर्व्वपुराणानां तद्वचनविषयत्वं स्यात्तथा च सर्व्वपुराणानि भागवतपदवाच्यानि स्युस्तस्मात्सारस्वतकल्पस्य यत्र प्रथमतः प्रतिपादनं स एव तद्वचनस्य विषयो वक्तव्यस्ताद्दृशञ्च देवीभागवतमेवास्तीति देवीभागवतमेव तद्विषयो वक्तव्य इति । किञ्च शिवपुराणे उमासंहितायाम् ।

"ब्रह्मणा संस्तुता सेयं मधुकैटभनाशने ।
महाविद्या जगद्धात्री सर्व्वविद्याधिदेवता ॥
द्वादश्यां फाल्गुनस्यैव शुक्लायां समभून्नृप ! ॥"

इति वचनात् फाल्गुनशुक्लद्वादश्यां देव्या उद्भवस्तद्दिने एव सारस्वतकल्पोद्भवस्तदुक्तं हेमाद्रौ कल्पश्राद्धप्रकरणे नागरखण्डे ।

"सारस्वतस्तु द्वादश्यां शुक्लायां फाल्गुनस्य च ।" इति ॥

तथा च सरस्वत्याः कल्प इत्यर्थकस्य ।

"सारस्वतस्य कल्पस्य मध्ये ये स्युर्नरामराः ।"

इति वचनस्य सर्व्वथा देवीभागवतमेव विषयो न विष्णुभागवतमिति बोध्यम् । किञ्च तस्य ग्रहणे तस्य हरिमाहात्म्यप्रतिपादकत्वात् । तदाश्रितकल्पस्य सात्त्विकत्वमेवायास्यति ।

"सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ।"

इति वचनात् । ततश्च संकीर्णेषु सरस्वत्या इति वचनेन सारस्वतकल्प इति नाम्ना च पारमहंस्यसामग्र्येव कर्त्तव्या स्यात् । अतो विष्णुभागवतं विहाय देवीभागवतमेवास्य वचनस्य विषयोऽनिच्छतापि वक्तव्यस्तस्मात् सारस्वतस्य कल्पस्येति वचनाद्देवीभागवतमेव महापुराणम् । अस्ति चात्र सरस्वत्याविर्भावप्रतिपादकं वचनम् । तदुक्तं देवीभागवते प्रथमस्कन्धे ।

"तस्यास्तु सात्त्विकी शक्ती राजसी तामसी तथा ।
महालक्ष्मीः सरस्वती महाकालीति ताः स्त्रियः ।
तासां तिसृणां शक्तीनां देहाङ्गीकारलक्षणः ।
सृष्ट्यर्थञ्च समाख्यातः सर्गः शास्त्रविशारदैः ॥" इति ।

"अम्बरीषशुकप्रोक्तं नित्यं भागवतं शृणु ।"

इति वचनमपि शुकाय प्रोक्तमिति व्युत्पत्त्या देवीभागवतपरमपि सङ्गच्छते । भवति हि देवीभागवतं शुकायैव प्रोक्तं व्यासेनेति । किञ्च

"अष्टादशपुराणानि कृत्वा सत्यवतीसुतः ।
भारताख्यानमखिलं चक्रे तदुपबृंहणम् ॥"

इति मात्स्यवचनमपि देवीभागवतस्यैव महापुराणत्वं बोधयति । अष्टादशपुराणोत्तरं भारतस्य जातत्वात् । भारतोत्तरञ्च विष्णुभागवतस्य जातत्वात् । भारतोत्तरकालं निर्व्विण्णो व्यासश्चकारेति विष्णुभागवते एवोक्तत्वात् । ननु

"वेदशाखाः पुराणानि वेदान्तं भारतन्तथा ।
कृत्वा सम्मोहसंमूढोऽभवं राजन् ! मनस्यपि ॥"

इति देवीभागवते तृतीयस्कन्धे एवोक्तत्वात्तत्रापि सविरोधस्तदवस्थ एवेति चेन्न । मन्मते तदानीं ग्रन्थो नैव जातः किन्तु जनमेजयं प्रति एवं वक्तास्मीति ज्ञानचक्षुषा ज्ञात्वा भारतात् पूर्व्वमेव देवीभागवतं कृतमित्यर्थस्य कल्पनात् । त्वन्मते तु तथा कल्पयितुं न शक्यते । चतुःश्लोकीभागवतोपदेशस्य जायमानत्वात् । उपदेशात् पूर्व्वं तज्ज्ञानाभावस्यावश्यं कल्पनीयत्वात् । यदि तत्रापि पूर्व्वं व्यासस्य ज्ञानमस्तीति स्वीक्रियते तदा वक्ष्यमाणः सर्व्वोप्यर्थवादः स्यात् । ततश्च ग्रन्थपारस्यभङ्गप्रसङ्ग इत्यास्तां तावत् । वस्तुतस्तु वेदशाखाः पुराणानीति पाठोऽशुद्ध इति वक्ष्यते तृतीयस्कन्धे तदा न कोऽपि विरोधः । यत्तु पाद्मे भागवतमाहात्म्ये श्रीमद्भागवतकथाश्रवणाय समागतानां परिगणनप्रसङ्गे ।

"वेदान्तानि च वेदाश्च मन्त्रास्तन्त्राणि संहिताः ।
दशसप्तपुराणानि षट्शास्त्राणि समाययुः ॥"

इत्युक्तम् । तत्र व्यासकृतपुराणानामष्टादशत्वादष्टादशेति वक्तव्ये सप्तदशत्वोक्तिः श्रीमद्भागवतस्याष्टादशत्वं गमयति तस्याष्टादशान्तर्गतत्वे देवीभागवतस्याष्टादशान्तर्गतत्वे चाष्टादशानां श्रोतृत्वसम्भवेन श्रोतुमागतानां पुराणानामष्टादशत्वानुक्तेर्निर्बीजत्वप्रसङ्गात् । एवं पाद्मे

"सप्तदशपुराणानि कृत्वा सत्यवतीसुतः ।
नाप्तवान्मनसा तोषं भारतेनापि भामिनि ! ॥
चकार संहितामेतां श्रीमद्भागवतीं पराम् ॥"

इति सप्तदशत्वोक्तिः श्रीमद्भागवतस्यैवैतां संहितामिति निर्द्दिष्टस्याष्टादशत्वं गमयति । देवीभागवतस्याष्टादशत्वेऽष्टादशपुराणानीत्यनुक्तेर्निर्बीजत्वप्रसङ्गादित्याहुस्तदसत् । तेषामेव वचनैर्विष्णुभागवतस्याष्टादशपुराणान्तर्गतत्वं न सिध्यति । किन्तु देवीभागवतस्यैवेति चार्थ्वधिकत्वं कुर्व्वाणो मूलमेव विनाशितवानिति न्याय आगतः । तथा हि भारतं व्याससुखाच्छ्रुत्वा तत्र सन्दिहानः क्रौष्टुकिर्मार्कण्डेयं प्रत्यागत्य सन्देहं पृष्टवान् तस्मै मार्कण्डेयो मार्कण्डेयपुराणमुक्तवान् । तदुक्तं मार्कण्डेयपुराणे

"तदिदं भारताख्यानं बह्वर्थं श्रुतिविस्तरम् ।
तत्त्वतो ज्ञातुकामोऽहं भगवन्तमुपस्थितः ॥"
इति ।

तथा च भारतोत्तरं मार्कण्डेयपुराणमभवत् । तथैव त्वदुक्तरीत्यैव विष्णुभागवतमपि । तथा च भारतात् पूर्व्वं षोड़शपुराणान्येव सिद्धानि । तथा च पूर्व्वोक्तवचनमध्ये षोड़शेत्येव वक्तव्ये सप्तदशेत्युक्तत्वात् । देवीभागवतमेव महापुराणमन्यथा सप्तदशत्वपूर्त्तिर्न स्यात् । तस्मात्तद्वचनप्रामाण्याद्देवीभागवतमेव महापुराणमिति सिध्यति न तु विष्णुभागवतम् । भारतात् पूर्व्वं सप्तदश मदीयभागवतसहितानि मार्कण्डेयमष्टादशमुभयमतसिद्धमेव विष्णुभागवतस्य भारतोत्तरं जायमानत्वेन तन्मध्ये तस्यावस्थानस्थलाभावादित्येवं लाघवेनापि दोषाभावादिति सुधियो विभावयन्तु । यत्तु किञ्च पाद्मे ।

"वैष्णवं नारदीयञ्च तथा भागवतं शुभम् ।
गारुड़ञ्च तथा पाद्मं वाराहं शुभदर्शने ! ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥"

इत्युक्त्या च भागवतस्य सात्त्विकत्वमुक्तम् । सात्त्विकेषु पुराणेष्विति कौर्म्मोक्त्या च सात्त्विकपुराणानां विष्णुपरत्वमुक्तम् । अतो विष्णुपरमेव भागवतमष्टादशपुराणान्तर्गतं न तु देवीभागवतमिति । अपि च स्कान्दे प्रभासखण्डे ।

"चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा तथा रविः ।
अष्टादशपुराणेषु शेषेषु भगवान् भवः ॥"

इत्युक्तम् । स्कान्दे सौरसंहितायाञ्च ।

"कथ्यते दशभिर्विप्राः पुराणैः परमेश्वरः ।
चतुर्भिर्भगवान् विष्णुर्द्वाभ्यां ब्रह्मा प्रकीर्त्तितः ॥
एकेनाग्निस्तथैकेन भगवांश्चण्डभास्करः ॥"

इत्युक्तमतोऽपि विष्णुभागवतमष्टादशान्तर्गतत्वमित्याहुस्तदसत् । त्वन्मते मत्स्योक्तसात्त्विकराजसतामससङ्कीर्णपुराणेषु मध्ये चयाणां व्यवस्था पूर्व्ववचनैस्त्वयोक्ता । सङ्कीर्णपुराणानान्तु नोक्ता । तेषां केषु पुराणेष्वन्तर्भाव इति वद । करिष्यामि कथञ्चिदिति चेन्मम मतेऽपि श्रीभगवत्या विष्णुशक्तित्वाभिमानेन मन्त्राधिष्ठात्रीं देवतां वेदमानो दुर्गां दुर्व्वोधध्वान्तमानुं गुरुञ्च इति श्रीक्रमदीपिकोक्तप्रकारेण विष्णुमन्त्राणां दुर्गायाः अधिष्ठातृत्वेन तयोरैक्याद्वा तत्प्रतिपादकभागवतस्य वैष्णवेष्वेवान्तर्भावात् । अतएव

"हरिद्वाभ्यां रविर्द्वाभ्यां द्वाभ्यां चण्डीविनायकौ ।
द्वाभ्यां ब्रह्मा समाख्यातः शेषेषु भगवान् शिवः ॥"

इति वचनं सङ्गच्छते । वस्तुतस्तु द्वयोरपि भागवतयोरस्मन्मते प्रमाणत्वात् । विष्णुभागवतपक्षपातिनां वचनानामस्माकं विरोधाभावेन तत्स्थापने प्रयोजनाभाव एव । तथा च नारदीयादिपुराणमतेन श्रीविष्णुभागवतं महापुराणं तद्वचनानि प्रसिद्धान्येवेति न लिखितानि । देवीभागवतन्तु तन्मते उपपुराणम् । शैव-